श्रीः

श्रीमते नारायणाय नमः

# पुरुषसूक्तम्

हरिः ओ(४)म् —

सहस्रशीर्षा पुरुषः। सहस्राक्षस्सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठ
दशाङ्गुलम्। पुरुष एवेदं सर्वम्। यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः।
यदन्नेनातिरोहति। एतावानस्य महिमा। अतो ज्यायाँश्च पूरुषः॥१॥

पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। त्रिपादूर्ध्व उदैत्पुरुषः।
पादोऽस्येहाभवात्पुनः। ततो विष्वङ्व्यक्रामत्। साशनानशने अभि। तस्माद्विराडजायत।
विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः॥२॥

यत्पुरुषेण हविषा। देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः।
सप्तास्यासन्परिधयः। त्रिस्सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः।
अबध्नन्पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः॥३॥

तेन देवा अयजन्त। साध्या ऋषयश्च ये। तस्माद्यज्ञात्सर्वहुतः। सम्भृतं पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यान्। आरण्यान्ग्राम्याश्च ये। तस्माद्यज्ञात्सर्वहुतः। ऋचस्सामानि
जज्ञिरे। छन्दाँसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत॥४॥

तस्मादश्वा अजायन्त। ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता
अजावयः। यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू।
कावूरू पादावुच्येते। ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः॥५॥

ऊरू तदस्य यद्वैश्यः। पद्भ्याँ शूद्रो अजायत। चन्द्रमा मनसो जातः। चक्षोस्सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत। नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौस्समवर्तत।
पद्भ्यां भूमिर्दिशश्श्रोत्रात्। तथा लोकाँ अकल्पयन्॥६॥

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः।
नामानि कृत्वाभिवदन् यदास्ते। धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः।
तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञमयजन्त देवाः।
तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानस्सचन्ते। यत्र पूर्वे साध्यास्सन्ति देवाः॥७॥

अद्भ्यस्सम्भूतः पृथिव्यैरसाच्च। विश्वकर्मणस्समवर्तताधि। तस्यत्वष्टाविदधद्रूपमेति। तत्पुरुषस्यविश्वमाजानमग्रे। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इहभवति। नान्यः पन्था विद्यतेऽयनाय। प्रजापतिश्चरतिगर्भे अन्तः। अजायमानो बहुधाविजायते॥ तस्य धीराः परिजानन्तियोनिम्। मरीचीनां पदमिच्छन्ति वेधसः॥८॥

यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वोयोदेवेभ्यो जातः। नमोरुचाय ब्राह्मये। ऋचंब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्यदेवा असन्वशे। ह्रीश्चते लक्ष्मीश्चपत्न्यौ। अहोरात्रेपार्श्वे। नक्षत्राणिरूपम्। अश्विनौव्यात्तम्। इष्टंमनिषाण। अमुंमनिषाण। सर्वं मनिषाण ।